दिगिति भेदः । "परत्वञ्चापरत्वञ्च द्विविधं परिकीर्त्तितम् । दैशिकं कालिकञ्चापि मूर्त्त एव तु दैशिकम् ॥ परत्वं सूर्य्यसंयोगभूयस्त्वज्ञानतो भवेत् । अपरत्वं तदल्पत्वबुद्धितः स्यादितीरितम् ॥ तयोरसमवायी तु दिक्संयोगस्तदाश्रये । दिवाकरपरिस्पन्दपूर्व्वोत्पन्नत्वबुद्धितः ॥ परत्वमपरत्वन्तु तदनन्तरबुद्धितः । अत्र त्वसमवायी स्यात् संयोगः कालपिण्डयोः ॥ अपेक्षाबुद्धिनाशेन नाशस्तेषामुदाहृत" इति भाषा० ।

**अपरदक्षिणा** अव्य० अपरा च दक्षिणा च "दिङ्नामान्यन्तराले इति" पा० सूत्रं बाधित्वा तिष्ठद्गुप्रभृतिपाठात् अव्ययी० । पश्चिमदक्षिणयोरन्तराले नैर्ऋते कोणे । तद्गणपाठाच्च नैतस्य समासान्तरघटकतेति विशेषः ।

**अपरपक्ष** पु० अपरः शेषः पक्षः । कृष्णपक्षे स हि चन्द्रस्य वृद्धिह्रासपक्षयोर्मध्ये शेषः, चैत्रशुक्लप्रतिपद्येव वर्षारम्भस्यात् शुक्लस्य पूर्व्वत्वम् सुतरां कृष्णस्यापरत्वम् । "पूर्व्वपक्षो देवानामपरपक्षः पितृणामिति" श्रुतिः । "यथा चैवाऽपरपक्षः पूर्व्वपक्षाद्विशिष्यते" इति मनुः "अथ श्राद्धममावास्यायां पितृणां दद्यात् पञ्चमीप्रभृति वाऽपरपक्षस्येति" स्मृतिः "अश्वयुक्कृष्णपक्षस्य प्रेतपक्षत्वेन अपरपक्षत्वव्यवहारः । "अमावास्यान्ततोयस्यापरपक्षस्ततस्तथा । तस्य पार्व्वणमुद्दिष्टं मुनिभिः पञ्चपात्रकमिति" स्मृतिः क्वचित् प्रेतपक्षेत्येव पाठः । "तुलादिषडशीत्यङ्गां षडशीतिमुखं क्रमात् । तच्चतुष्टयमेव स्याद्द्विस्वभावेषु राशिषु ॥ षड्विंशे धनुषो भागे द्वाविंशेऽनिमिषस्य च । मिथुनाष्टादशे भागे कन्यायास्तु चतुर्दशे ॥ ततः शेषाणि कन्याया यान्यहानि तु षोड़श । क्रतुभिस्तानि तुल्यानि पितृणां दत्तमक्षयम्" इति सूर्य्यसिद्धान्तोक्तेः षड़शीतिमुखावशिष्टानां षोड़शानां दिनानां श्राद्धप्रशस्तकालत्वादपरपक्षत्वम् अथ वा नास्ति परो यस्मात् तादृशः पक्षः । ताथाचाक्षयपुण्यदत्वेन अत्युत्कृष्टत्वात्तथात्वम् । पञ्चादशाहस्यैव पक्षत्वेऽपि षोडशानां दिनानां किञ्चिदधिकपक्षत्वात् पक्षत्वम् तेषां सौरत्वेऽपि चान्द्रे पक्षे व्यवहारस्य गौणतेति भेदः । विकल्प्यमानयोः पक्षयोर्मध्ये शेषपक्षे च ।

**अपररात्र** पु० अपरं रात्रेः एकदे०त० अच् समा० । रात्रिशेषे "अपररात्रे सायंदोहमिति" कात्या० ७,४,३०, "अपररात्रकृतम्" सि०कौ० ।

**अपरव** पु० अपकृष्टोरवःप्रा०त० । अकीर्त्तौ अपयशसि ।

**अपरवक्त्रा** न० "अयुजि ननरला गुरुः समे नजमपरवक्त्रमिदं ततोजरौ" इति वृत्तरत्नाकरोक्ते अर्द्धसमे मात्रावृत्तभेदे "वदन्त्यपरवक्त्राख्यं वैतालीयं विपश्चितः । पुष्पिताग्राभिधं केचिदौपच्छन्दसिकं तथेति वृ०र० । अपरवक्त्रा स्त्रियामिति केचिदाहुः ।

**अपरवैराग्य** न० कर्म्म० । पातञ्जलोक्ते वैराग्यभेदे । यथा "दृष्टानुश्राविकविषयवितृष्णस्य वशीकारसंज्ञं वैराग्यमिति" यतमानव्यतिरेकैकेन्द्रियवशीकारसंज्ञास्चतस्रः तत्र रागादीनां चित्तस्थानां कषायाणां विषयेष्विन्द्रियप्रवर्त्तकानां पाकाय प्रयत्नो यतमानसंज्ञं वैराग्यं ततः पक्वानां केषाञ्चित्कषायाणां वक्ष्यमाणेभ्यो विरागावधारणं व्यतिरेकसंज्ञं वैराग्यं, ततः पक्वानां सर्व्वेषामिन्द्रियप्रवर्त्तनाऽशक्तानां मनस्यौत्सुक्यरूपेणावस्थानमेकेन्द्रियसंज्ञं वैराग्यम्, स्त्रियोन्नपानमित्यादिषु दृष्टेषु, गुरूच्चारणमनु श्रवः श्रवणं यस्य सोऽनुश्रवो वेदः तदुक्तेष्वानुश्राविकेषु स्वर्गादिदिव्यविषयेषु मर्त्त्येषु च विनाशपरितापसातिशयत्वास्रूयादिदोषाणामभ्यासेन साक्षात्काराद्वितृष्णस्योपेक्षाबुद्धिः वशीकारसंज्ञं वैराग्यमित्यर्थः । एतानि च संप्रज्ञातसमाधेरन्तरङ्गाणि असंप्रज्ञातसमाधेस्तु बहिरङ्गाणि" इति पा० वृ० ।

**अपरस्पर** न० अपरस्य परस्य क्रियासातत्ये द्वित्वं सुच । क्रियासातत्ये । क्रियावतां सातत्ये तु त्रि० । अपरास्पराः पुमांसः, योषितो वा गच्छन्ति अपरस्पराणि कुलानि यान्ति । सततमविच्छेदेन गच्छन्तीत्यर्थः । "अपरस्पराः सार्था गच्छन्ति" सि०कौ० ।

**अपरहैमन** त्रि० अपरहेमन्ते भवः अपरहेमन्त+भवार्थे अण् तलोपः उत्तरपदवृद्धिः । हेमन्तशेषभवे । एवं पूर्व्वहैमनः हेमन्तपूर्व्वभवे त्रि० ।

**अपरा** स्त्री अपसृत्य राति गृह्णाति जन्म यस्याः रा—अपादाने बा०ड । जरायौ ततोऽपयानादेव गर्भान्निस्सरणाज्जन्मेति तस्यास्तथात्वम् । अधिकमपरशब्दे दृश्यम् ।

**अपराग** पु० अप+रन्ज—घञ् नलोपकुत्वे । अननुरागे विरागे "अनुरागापरागौ च प्रचारं मण्डलस्य चेति" मनुः ।

**अपराग्नि** पु० द्विव० कर्म्म० । गार्हपत्यदक्षिणाग्न्योः, "अन्तरेणापराग्नी गत्वा दक्षिणेनेति" कात्या० ४,१२,१२, "अपराग्नो गार्हपत्यदक्षिणाग्नी" इति तद्भा० । अन्तिमाग्नौ अन्त्येष्टिकर्म्माङ्गवह्नौ पु० एकव० ।

**अपराङ्ग** न० अपरस्य रसादेरङ्गम् । गुणीभूतव्यङ्ग्ये काव्यभेदे । "अगूढमपरस्याङ्गमिति" काव्य०प्र० । अपरस्य रसादेः वाक्यार्थीभूतस्य वा वाच्यस्याङ्गम् यथा "अयं स